हूणः ( -नः ) 1 A barbarian, foreigner; सद्यो माण्डितमत्त-हूणचिबुकप्रस्पर्धि नारङ्गकम्; ग्रासं ग्रासं चरति परितः कश्चिदेणाङ्कहूणः Rām. ch. 6. 96. -2 A kind of golden coin, ( probably current in the country of the Hūṇas ). -णाः m. pl. N. of a country or its people; हूणावरोधानाम् R. 4. 68.

हूत p.p. [ ह्वे-क्त संप्रसारणम् ] 1 Called, summoned, invited &c.; see ह्वे.

हूतम् The act of calling; P. VIII. 2. 84.

हूतिः f. [ ह्वे-क्तिन् संप्रसारणम् ] 1 Calling, inviting. -2 Challenging. -3 A name; as in हरिहेतिहूति q. v.

हूम् &c. See हुम्; ( a particle expressing anger ); ...हूं मातर्, दैवतानि धिक् Bk. 6. 11.

हूरवः A jackal.

हृ 1 U. (हरति-ते, जहार, जह्रे, अहार्षीत्, अहृत, हरिष्यति-ते, हर्तुम्, हृत; pass. ह्रियते ) 1 To take, carry, convey, lead, ( often used with two accusatives in this sense ); अजां ग्रामं हरति Sk.; संदेशं मे हर धनपतिक्रोधविश्लेषितस्य Me. 7; Ms. 4. 74. -2 To carry off or away, take or draw to a distance; हरामि रामसौमित्री मृगो भूत्वा मृगयुवौ Bk. 5. 47. -3 To take away, rob, plunder, steal; दुर्वृत्ता जारजन्मानो हरिष्यन्तीति शङ्कया Bv. 4. 45; R. 3. 39; Ku. 2. 47; Bk. 2. 39; Ms. 7. 43. -4 To strip off, deprive of, despoil, take away; वृन्तात्श्लथं हरति पुष्पमनोकहानाम् R. 5. 69; Bk. 15. 116; Ms. 8. 334. -5 To take away, cure, destroy; उत्कण्ठां तां हरिष्यामि मेघलेखामिवानिलः Rām. 7. 40. 19; तथापि हरते तापं लोकानामुन्नतो घनः Bv. 1. 39; R. 15. 24; Me. 31. -6 To attract, captivate, win over, influence, subdue, enchant; चेतो न कस्य हरते गतिरङ्गनायाः Bv. 2. 157; ये भावा हृदयं हरन्ति 1. 103; तवास्मि गीतरागेण हारिणा प्रसभं हृतः Ś. 1. 5; हरति मे हरिवाहनदिङ्मुखम् V. 3. 6; मृगया जहार चतुरेव कामिनी R. 9. 69; 10. 83; Rs. 6. 21; इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः Bg. 2. 60; 6. 44; Ms. 6. 59. -7 To gain, acquire, obtain; ततो विंशं नृपो हरेत् Ms. 8. 391, 153; Y. 2. 123; स हरतु सुभगपताकाम् Dk. -8 To have, possess; अङ्गैः सुकुमारतरैः सा कुसुमानां श्रियं हरति Bv. 2. 163. -9 To surpass, eclipse; त्वां हरन्तीं श्रियं श्रियः Bk. 5. 71. -10 To marry; पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन् Ms. 9. 93. -11 To divide. -12 To cast, throw ( as an arrow ). -13 To accept, receive, inherit. -14 To offer. -Caus. ( हारयति-ते ) 1 To cause to take, carry or convey, send ( something ) by one, ( with acc. or instr. ); भृत्यं भृत्येन वा भारं हारयति Sk.; जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् Me. 4; Ms. 8. 114; Ku. 2. 39. -2 To cause to be taken away, to lose, be deprived of. -3 To give away. -Desid. ( जिहीर्षति-ते ) To wish to take &c. -II. 3 P. ( जिहर्ति ) To take by force.

हृत् a. ( At the end of comp. only ) Taking away, seizing, removing, carrying off, attracting &c.

हृत p. p. [ हृ-क्त ] 1 Taken or carried away. -2 Seized. -3 Captivated. -4 Accepted. -5 Divided; see हृ. -तम् A portion, share. -Comp. -अधिकार a. 1 dismissed from authority, turned out. -2 deprived of one's due rights. -उत्तर a. deprived of an answer; हृतोत्तरं तत्त्वविचारमध्ये Ki. 17. 43. -उत्तरीय a. having the upper garments stripped off. -दार a. bereft of one's wife. -द्रव्य, -धन a. spoiled of wealth. -प्रसाद a. deprived of calmness. -मानस a. robbed of one's senses. -शिष्ट a. spared from pillage. -सर्वस्व a. stripped of all one's property, utterly ruined. -सार a. robbed of the best part.

हृतिः f. 1 Seizure. -2 Robbing, spoliation. -3 Destruction. -4 ( In astr. ) A portion of a particular side of a triangle on the celestial globe.

हृ ( ह्रि ) णीयते Den. Ā. 1 To be angry. -2 To feel ashamed ( with instr. or gen. ); त्वयाद्य तस्मिन्नपि दण्डधारिणा कथं न पत्या धरणी हृणीयते N. 1. 133; दिवोपि वज्रायुधभूषणाया हृणीयते वीरवती न भूमिः Bk. 2. 38.

हृणिः m. 1 Anger. -2 Flaming.

हृणी ( णि ) या 1 Censure, reproach. -2 Shame; निलीय तस्यैव तनौ हृणीयया Rām. ch. 2. 73. -3 Compassion.

हृत्वन् m. [ हृ-क्वनिप् Uṇ. 4. 105 ] 1 A fisherman. -2 N. of Śiva.

हृद् n. ( This word has no forms for the first five inflections, and is optionally substituted for हृदय after acc. dual ) 1 The mind, heart; त्यक्तं गृहाद्यपि मया भवतापशान्त्यै नासीदसौ हृतहृदो मम मायया ते Bhagavaccharaṇa S. 15. -2 The chest, bosom, breast; इमां हृदि व्यायतपातमक्षिणोत् Ku. 5. 54. -3 The soul. -4 The interior or essence of anything. -Comp. -आमयः sickness of heart. -आवर्तः a lock or curl of hair on a horse's chest. -उत्क्लेदः, -उत्क्लेशः nausea. -कम्पः tremor of the heart, palpitation. -ग a. reaching up to the breast (as water, आचमनजल); हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः Ms. 2. 62. -गत a. 1 seated in the mind, conceived, designed. -2 cherished. ( -तम् ) design, meaning, intent. -ग्रन्थः a heart-sore. -ग्रहः spasm of the heart. -देशः the region of the heart. -द्योतन a. breaking the heart. -द्रवः too quick pulsation. -पिण्डः, -ण्डम् the heart. -रोगः 1 a heart-disease, heartburn. -2 sorrow, grief, anguish. -3 love. -4 the sign Aquarius of the zodiac. -लासः ( हृल्लासः ) 1 hiccough. -2 disquietude, grief. -लेखः ( हृल्लेखः ) 1 knowledge, reasoning; कीर्त्यर्थमल्पहृल्लेखाः पटवः कृत्स्ननिर्णयाः Mb. 12. 262. 27. -2 heart-ache. -लेखा ( हृल्लेखा ) grief, anxiety; यदा व्यपेतहृल्लेखं मनो भवति तस्य वै Mb. 12. 294. 31. -वण्टकः the stomach. -शयः 1 the god of love; अहोरूपमहो धाम अहो अस्या नवं वयः। इति ते तामभिद्रुत्य पप्रच्छुर्जातहृच्छयाः॥ Bhāg. 8. 9. 2. -2 love; हृच्छयेनाभिभूतात्मा भीमसेनमकामयत् Mb. 3. 12. 95. -3 soul, conscience ( अन्तर्यामी ); नूनं तयोरनुमते हृदि हृच्छयचोदितः Mb. 12. 334. 13. -शूलम् an acute pain in the chest. -शोकः heartburn or anguish. -सारः courage; अद्राक्षमहमेतत्ते हृत्सारं महदद्भुतम् Bhāg. 7. 3. 18. -स्तम्भः paralysis of the heart. -स्फोटः breaking of the heart.